# महासलिलम्

**आचार्यः वीरनारायणपाण्डुरङ्गी**
वेदान्तनिकायाध्यक्षः, कर्नाटकसंस्कृतविश्वविद्यालयःबेङ्गळूरु

---

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे

श्रीगुरुराजो विजयते

महदिदं प्रमोदस्थानं यत् प्राचीनस्य गर्गमुन्युपज्ञस्य तदीयविद्या-वंशोभयप्रोक्तस्य वृद्धगार्गीयज्यौतिषग्रन्थस्य उपोद्घातरूपोयं महासलिलग्रन्थः वेदरहस्यार्थबोधनपरः अत एव वेदाङ्गभूतः वेदार्थावगमे तदङ्गाध्ययने प्रवर्तमानानां विदुषां, प्राचीनभारतीयज्ञानमार्गावगतौ समुत्सकानां चान्येषां सर्वेषामेवात्यन्तोपकारकः प्राच्यनव्योभयविज्ञानविशारदेन निरन्तरं प्राचीनसुरसरस्वतीसेवानिरतेन प्रो. नारायण अयङ्गारवर्येण सूक्ष्मेक्षिकया संशोध्य व्याख्याय प्राकाश्यं नीयते इति।

प्रो. नारायण अयङ्गारमहोदयः बहुभ्यो देशेभ्यः बहून् प्राचीनान् (गर्गसंबद्धेषु मिलित्वा 26 कोशेषु वृद्धगार्गीयज्यौतिषसंबन्धिनः 11) हस्तलिखितकोशान् अन्विष्यानीय तत्सर्वं समाकलय्य तदाधारेण महासलिलाख्यवेदाङ्गज्यौतिषग्रन्थं इदंप्रथमं संपाद्य सम्यग्विमृश्य स्वकृताङ्ग्लव्याख्यया सह प्राकाश्यमानयति। वेदार्थावगमे प्रवर्तमानानां जनानां रोचकान् कांश्चन महासलिलविषयानत्रोपस्थापयामि।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।। 41
इति पाणिनीयशिक्षायामुक्तरीत्या वेदस्य चक्षुःस्थानीयमङ्गं ज्यौतिषम्।
वैदिककर्मणां तत्तत्कालविशेषकर्तव्यतायां व्यवस्थितायां कालनिर्णायकमङ्गमेव ज्यौतिषम्। बाह्वृचवेदेपि खलु

यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयन्ता।
रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता।। १.११६.१८ इत्यृग्वेदे

ततः प्रजापतिरभयं चतुर्थगं् स वा एष दिव्यः शाक्वरः शिशुमारस्तगं् ह य एवं वेदाप पुनर्मृत्युं जयति तै.आ॥०।२।१९।२३ इति तैत्तिरीये चोक्ताः तारादिसमूहाः,

अयं यो होता किरु स यमस्य कमप्यूहे यत्समञ्जन्ति देवाः।

अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहम्॥ १०.०५२.०३

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्।

औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त॥ १०.०५२.०६ इत्यादौ बहुत्र निर्दिष्टाः संख्याविशेषाश्च ज्योतिश्चक्रविषया एव, अन्यथानुपपन्नाश्च। किंबहुना देवतानिरूपणप्रकारः यज्ञनिरूपणप्रकारश्च ज्योतिश्चक्राधृत एवास्ते इति ज्यौतिषाध्ययनं विना न वेदार्थग्रहणं सुष्ठु संभवतीति विपश्चिदेकवेद्यम्। तथा च सुष्ठु उद्घोषितं-

कालज्ञानमिदं पुण्यमाद्यं हि ज्ञानमुत्तमम् ।

ब्रह्मणा सृजता वेदानतः सृष्टं महात्मना ॥

यदङ्गमाद्यं वेदानां क्रियाणां च प्रमाणकम् ।

ज्योतिषं सर्ववेदानाम् अतो वेद्यं विदुर्बुधाः ॥

ज्योतिश्चक्रे हि सर्वस्य लोकस्योक्तं शुभाशुभम्।

स वेदस्तस्य नयने स वेत्ति परमां गतिम् ॥

चन्द्रनक्षत्रताराणां ग्रहाणां भास्करस्य च ।

ज्योतिषामपि यज्जोतिर्ज्योतिषामपि पावनम् ॥

तद्भावभाविनं युक्तं तं देवा ब्राह्मणं विदुः ।

तस्मात् पूर्वमधीयेत ज्योतिषाम् अयनं द्विजः॥

धर्मसूत्रं ततः पश्चाद्यज्ञकर्मविधिक्रियाः ।

यज्ञाद्यायुष्यहोमाश्च मन्त्रोपनयनानि च ॥2.16-21 इति वृद्धगार्गीयज्यौतिषे।

तद्वेदाङ्गज्यौतिषं किम् इति जिज्ञासायामद्ययावत् सांप्रदायिकैः

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्

दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः १

प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्

कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः २

इत्यादिपञ्चत्रिंशच्छलोकात्मको ग्रन्थ एव वेदाङ्गं ज्यौतिषमित्यभ्यस्यते। तत्र श्रविष्ठादिवर्षक्रमस्य ग्रहणात् लगधग्रन्थः इतः प्राक् 3300 वर्षकालीनो भवति।

परन्तु तत्र सामान्यतः कालगणनायाः नक्षत्राणां च निरूपणे सत्यपि ज्योतिःशास्त्रसंबन्धिनां विषयाणां विस्तरेण निरूपणाभावेन कथमिदं ज्यौतिषमाश्रित्य व्यवहारः प्रावर्ततेति चिन्तनीयम्।

वृद्धगार्गीयज्यौतिषाङ्गे महासलिलाख्ये चास्मिन् शास्त्रे एतेषां विषयाणां निरूपणं दृश्यते इति एतदेव वेदाङ्गं संभवेत्।

वृद्धगार्गीयज्यौतिषं च चतुर्विंशत्यङ्गैः चत्वारिंशदुपाङ्गैश्च समन्वितं विस्तरेण सूर्यचन्द्रादीनां ग्रहाणां संवत्सरर्तुपर्वग्रहनक्षत्रतिथिमुहूर्तकरणानां स्वरूपं निरूपयत् अत्यन्तमुपयोगितामावहति।

तस्यास्य वृद्धगार्गीयज्यौतिषस्य चतुर्विंशतितममङ्गं चेदं महासलिलं सूर्यचन्द्रयोः शुक्रबृहस्पत्यङ्गारकशनैश्चरबुधानां पञ्चताराग्रहाणां तामसराहोः एकोत्तरशतं धूमकेतूनां चेति वेदोक्तानाम् अष्टोत्तरशतं ज्योतिषां संवत्सरर्तुपर्वग्रहनक्षत्रमुहूर्तकरणानां कालावयवानां च संक्षिप्य निरूपणेन सर्वेषामेव वृद्धगार्गीयज्यौतिषाङ्गानां आदिमं अन्येषामङ्गानामुपाङ्गानां चोपोद्घातरूपेण विलसति। यद्यपि मघादिवर्षक्रमनिरूपणेन विषयदृष्ट्या भाषादृष्ट्या च वृद्धगार्गीयज्यौतिषापेक्षया प्राक्तनमिदं तथापि कालक्रमेण विनाशदशापन्नं सत् तदङ्गेषु योजितं यथाकथंचित् एतावत्पर्यन्तं सुरक्षितमस्य अयङ्गारमहोदयस्य महता प्रयासेन प्रकाश्यतामापन्नम्। एतदध्ययनानन्तरमेव अन्येषामङ्गानामध्ययनं सुशकम्।

ब्राह्मणग्रन्थसदृशं लघुवाक्यसंदृब्धमिदं सृष्ट्यादिभूतमहासलिले अण्डोत्पत्तिं तत्र अग्नि-भृगु-आङ्गिरस-कश्यप-वसिष्ठ-गो-तेजसाम् उत्पत्तिं निरूप्य ततः पञ्चभूतादिक्रमेण समस्तजगदुत्पत्तिं वर्णयति। अस्य च महासलिलवर्णनपरत्वादेव महासलिलाख्या अन्वर्था। सलिलं च न सामान्यजलम् अपि तु वेदषु प्रसिद्धं घनीभूतं किमप्युदकसदृशमुपादानद्रव्यम्।

तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम्। १०.१२९.०३ इति वेदोक्तरीत्या सर्वप्रपञ्चस्य महदिदमुपादानं, अत एव महासलिलाख्यं तद् द्रव्यम्।

न केवलं महासलिलस्य अपि तु वेदानुसारेण समस्तप्रपञ्चस्य स्थावरजङ्गमानां चोत्पत्तेः पृथिवीसंनिवेशस्य चतुर्णां प्राग्ज्योतिष-जम्बू-केतुमाला-उत्तरकुर्वाख्यानां मेरोः परितः प्राच्यादिदिक्षु स्थितानां द्वीपानां हिमवदादिपर्वतानां सरस्वत्यादिनदीनां निरूपणमप्यत्र संक्षेपेण दृश्यते।

ततश्च सोमार्कयोरुत्पत्तिः तेन दिवसरात्रिसंभवः, सोमार्कयोः पृथिव्यपेक्षया दूरपरिमाणविशेषः, प्राच्यादिदिङ्नाम्नां कारणानि, सूर्यस्य उत्तर-दक्षिणानयनयोः कारणनिरूपणपूर्वकम् ऋत्वादिविभागवर्णनं, चन्द्रस्य वृद्धिक्षयादिनिरूपणं चात्र दृश्यते। एवमेव शुक्रादिपञ्चताराग्रहाणां

तद्भिन्नस्य तमोलक्षणस्य राहोः एकशतं केतूनां कृत्तिकादिनक्षत्राणां तथा तद्भिन्नानाम् अगस्त्यसप्तर्षिध्रुवाख्यताराणाम् अभ्रोत्पत्ति-वृष्ट्यादेरपि निरूपणमत्र दृश्यते।

**द्रष्टव्याः विशेषांशाः**

**ग्रहाणां संख्या**

कृचिज्जायते सनयासु नव्यो **वने तस्थौ पलितो धूमकेतुः**।
अस्नातापो वृषभो न प्र वेति सचेतसो यं प्रणयन्त मर्ताः॥ १०.००४.०५ इत्यादौ ऋग्वेदेपि पठितस्य केत्वाख्यस्य धूमकेतोरेव निरूपणा दृश्यते। नायं केतुः आधुनिकज्यौतिषादिविभावितरीत्या एकः ग्रहः, अपि तु एकोत्तरशतसंख्याविशिष्टः धूमकेतुरेवेति स्पष्टम्।

राहोरपि षण्मासावधौ क्वचिद्दृश्यमानत्वं ग्रहत्वं च स्पष्टमेवात्र न्यरूपि। तस्मात् अष्टग्रहपक्ष एव वैदिक इति नवग्रहपक्षः अर्वाक्कालिकः इति च स्पष्टमनेन विभाव्यं सुधीभिः।

**अष्टोत्तरशतसंख्या**

अष्टोत्तरशतमिति लोके प्रसिद्धा संख्या। अत्र च न कोपि कारणविशेषः लक्ष्यते। परन्तु महासलिले च सूर्यचन्द्रादयः अष्टोत्तरशतं आकाशकायाः गणिताः इति हेतोरेव तस्याः संख्यायाः प्रसिद्धिरित्यूह्यते।

**तिथिशब्दार्थः**

वेदे तु “अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिऽतिथेरातिथ्यमसि” (5.1. वाजसनेये) इत्यादौ बहुत्र अतिथिशब्दो दृश्यते। “तिथिविशेषं विनैवातिक्षुधया पीडिते विप्रेऽतिथौ समागते तत्सत्काराय क्रियमाणः पादक्षालनभोजनसंवहनादिसंस्कार आतिथ्यमुच्यते । अतिथेरिदमातिथ्यम् 'अतिथेर्ञ्यः' (पा० ५.४.२६) इति ञ्यप्रत्ययः” इत्युव्वटः तद्भाष्ये।

“अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते” इति मनुश्च 3.102। तस्मात् अतिथिशब्दस्य तिथिशब्दसंबन्धो वर्तते इति प्रतीयते।

तथापि तिथिशब्दमात्रस्य ऋग्वेदादिवेदेष्वप्रयोगात् प्राचीनकाले तस्य शब्दस्य दिनसामान्ये प्रयोगो नासीत् इति ज्ञायते।

प्राचीनग्रन्थेषु तावत् पूर्णचन्द्रसंबन्धे एव तिथिशब्दो दृश्यते। तथाहि

तदाहुर्यद्दर्शपूर्णमासयोरुपवसति न ह वा अव्रतस्य देवा हविरश्नन्ति तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति। पूर्वां पौर्णमासीमुपवसेदिति पैङ्ग्यमुत्तरामिति कौषीतकं या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राका। या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूः। **यां पर्यस्तमियादभ्युदियादिति सा तिथिः**। ॥7.11॥ इति ऐतरेयब्राह्मणोक्ता तिथिः।

महाराजप्रोष्ठपदाट्ठञ् (पाणिनिः 4.2.35) इति सूत्रे "पूर्णमासादण्" "पूर्णमासादण्वक्तव्यः। पूर्णमासो वर्ततेऽस्मिन् काले पौर्णमासी तिथिः" इत्यादिपातञ्जलभाष्ये पूर्णमाससंबन्धितयैव तिथिशब्दो दृश्यते। प्रतिपदादिषु इदानीं तिथित्वेन व्यवह्रियमाणासु दिनव्यक्तिषु प्राक्काले तिथिव्यवहारो नासीत्।

तस्मादेव महासलिलेपि "संवत्सर्तुपर्वग्रहनक्षत्रमुहूर्तकरणानां वा किं प्रमाणम् आदिर्वा" इति प्रश्नः, (म.स. 23) "एवं हि कालो ज्योतिषामादिमूलश्च संवत्सर-अयनर्तु-मास-पक्ष-अहोरात्राणि निष्पादयित्वा सर्वेषां च कर्मकालानां कलालवसंज्ञितानां कलनेन च अस्तमनोदयौ कुर्वति" (म.स. 46) इत्युत्तरं च तिथिपदाघटिततया एव दृश्येते।

**सोमरोहिणीकथारहस्यम्**

**प्रजापतेस्त्रयस्त्रिंग्ंशद्दुहितर** आसन्ताः सोमाय राज्ञेऽददा**त्तासागं् रोहिणीमुपैत्ता** ईर्ष्यन्तीः पुनरगच्छन्ता अन्वैत्ताः पुनरयाचत ता अस्मै न पुनरददाथ्सोब्रवीदृतममीष्व यथा समावच्छ उपैष्याम्यथ ते पुनर्दास्यामीति स ऋतमामीत्ता अस्मै पुनरददात्तासागं् रोहिणीमेवोपैत् तं यक्ष्म आर्च्छद् राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत्पापीयानभवत्तत्पापयक्ष्मस्य यज्जायाभ्योऽविन्दत्तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एता एव नमस्यन्नुपाधावत्ता अब्रुवन्वरं वृणामहै समावच्छ एव न उपाय इति तस्मा एतमादित्यं चरुं निरवपन्तेनैवैनं पापाथ्स्रामादमुञ्चन्॥ तै.सं॥२।३।५ ॥ इति तैत्तिरीये अन्यत्र चोक्तः सोमरोहिणीवृत्तान्तोपि चन्द्ररोहिणीनक्षत्रयोरेव इति महासलिलग्रन्थावलोकनेन सम्यक् ज्ञायते।
"सः प्रजापतिं अभ्यवगच्छन् इतोर्ध्वं च तानि च नक्षत्राणि नक्षत्रम्" (म.स.88) इत्युक्त्या "प्राक् रोहिणीनक्षत्रस्थबृहत्तारायाः एकस्याः एव प्राधान्यमासीत्, कालान्तरे च अन्यताराभिः सह तस्याः संगमनेन, नक्षत्रत्वसंपादनम् अभूत्" इति प्राचीनो विषयः अनेन ज्ञाप्यते। नेदं सोमदेवता-तत्पत्नीविषयमिति आपातप्रतीत्यनुसारेण चिन्तनीयम्।

**सान्नाय्यम्**

आग्नेयः पुरोडाशो भवत्यैन्द्रं सांनाय्यं २.४.४.[८] इत्यत्र शतपथ प्रतिपादितं सांनाय्यं किमिति प्रश्नः।

सान्नाय्यं नाम दर्शयागे आहुतित्वेन दीयमाने दधिपयसी इति श्रौतपदार्थनिर्वचनकोषे मीमांसाकोषे च। "पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु"इति पाणिनिसूत्रव्याख्याने 3.1.129 "संपूर्वान्नियतेर्ण्यदायादेशावुपसर्गदीर्घत्वं च निपात्यते। सान्नाय्यं हविः। सन्नेयमन्यत्। रूढित्वाच्च हविर्विशेष एवावतिष्ठते" इति काशिका। "सान्नाय्यमिति। सम्यङ् नीयते होमार्थमग्निं प्रतीति कर्मणि ण्यत्" इति पदमञ्जरी।

**सर्वस्यापि हविषः संनयनात् सर्वस्य हविषः सांनाय्यमिति नाम स्यात्। न च तथा दृश्यते। अतोस्य रहस्यं किमित्यन्विष्यमाणे महासलिले इदं दृश्यते।**

**"सः (चन्द्रमाः) भक्ष्यमाणः स्वयोनिवत् शस्य आप ओषधिवनस्पतिब्राह्मणान् गाश्च एतेषु वसति। तत् अमावास्याया अमावास्यत्वम्। तस्मात् येन सन्नाय्येन अमावास्यां संनयति तत् सान्नाय्यत्वं भवति। स सन्नातो परे पश्चात् दृश्यते" (म.स.51) इति। सन्नाय्यं नाम उभयोः एकदेशावच्छेदेन स्थितिः। तदा सूर्येण सह वसन् चन्द्रः अमावास्यां निष्पादयति इति कारणेन अमावास्यायाः एव सान्नाय्यं इति नामान्तरं भवति। अत एव तादृशसान्नाय्यपरिचयार्थमेव अमावास्यायां दधिपयोरूपस्य सान्नाय्यहविषः उपयोगः क्रियते। प्रतिपद्दिनमारभ्य अमावास्यान्तकाले चन्द्रकलानां पानं देवैः क्रियते ततः परमाप्यायनं च भवति इति कारणेन वैश्वदेवचरुनिर्वापोपि महासलिले (89) उक्तः।**

**वैदिकयज्ञानां परमं रहस्यम् अधिदैवतार्थः**

वेदानां खल्वनेकार्थाः सन्तीति अनुभवप्रमाणाभ्यामवसीयते। अनेकेष्वर्थेषु अधिदैवतार्थः आकाशकायविषयकः मुख्यः इति ऐयंगारमहोदयाः।

तथाहि यज्ञो नाम प्रकृतिसंबन्धिनां विषयाणां सम्यङ्निरूपणम् तदनुकरणमेव। अत एव अहोरात्रसंधिरूपेण सायंप्रातग्निहोत्रम्, शुक्लादिपक्षसंधिरूपेण दर्शपूर्णमासौ ऋतुसंधिरूपेण चातुर्मास्ययागाः, वर्षसंधिरूपेण सोमयागः, विषुवादियोगेन गवामयनादिरूपाश्चा यागाः समनुष्ठीयन्ते। सोमः इन्द्रः प्रजापतिः संवत्सरः इत्यादयः कालप्रतीकभूताः। कालगणनायैव एते प्रयत्नाः प्राचीनानां बभूवुः। अत एव अग्निहोत्रे सूर्यप्रजापत्योः कालप्रतीकयोः आहुतिः दीयते। दर्शपूर्णमासयोः अमावास्या-पूर्णमासयोराहुतिः पार्वणहोमरूपेण दीयते-

"ऋषभं वाजिनं वयम् | पूर्णमासं यजामहे | स नो दोहतागं् सुवीर्यम् | रायस्पोषगं् सहस्रिणम् | प्राणाय सुराधसे | पूर्णमासाय स्वाहा | अमावास्या सुभगा सुशेवा | धेनुरिव भूय आप्यायमाना | सा नो दोहतागं् सुवीर्यम् | रायस्पोषगं् सहस्रिणम् | अपानाय सुराधसे | अमावास्यायै स्वाहा|" तै. ब्रा॥३।७।५।१३ || इति मन्त्राभ्याम्।

अत एव सोमयागे ऋतुग्रहाः संपाद्यन्ते। सोमग्रहाश्च अन्तरिक्षे विद्यमानग्रहाणां प्रतीकभूताः एव। तदेवं सम्यगवलोक्यमाने प्रायः सर्वेषामर्थवादतया अधुना अभिप्रेतानां वेदवाक्यानामर्थाः सम्यक् ज्ञायन्ते। तमेतं मुख्यं विषयं विहाय केवलं वेदोक्तक्रियारूपेण वेदोक्तत्वमात्रेण अनुष्ठानं न रोचते सूक्ष्मबुद्ध्या क्रियाकलापं व्यवस्थापितवद्भ्यः महर्षिभ्यः। वेदोक्तरहस्यमनभिज्ञाय केवलं यज्ञानुष्ठानं कुर्वन्तस्तु "स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥ १.१८" इति निरुक्तोदाहृतेन वेदेन ते अतीव निन्दिताः।

**संमतमिदं मध्वाचार्याणामपि सर्वेषु वेदेषु त्र्यर्थतां स्पष्टतया ऐदंप्राथम्येन बोधितवताम्।** यागादिक्रियाणां च प्रतीकरूपेणानुष्ठानं करणीयमेव। अत एव इन्द्राग्निसूर्यमित्रवरुणमरुत्प्रजापत्यादीनां बाह्यप्रतीकाणां, तदभिमानिनीनां अस्मददृश्यानां शापानुग्रहादिशक्तानां देवतानां, तदन्तर्यामिणः एतेषु बाह्यवस्तुषु तदन्तर्गतदेवेषु च स्थित्वा तत्प्रेरकस्य च विष्णोश्च इति सर्वेषामेव वेदप्रतिपाद्यता। एकस्यैव महतो देवस्य कार्यान्तरवशेन तत्तद्देवतानामान्यपि भवन्ति। व्यक्तमत्राप्युक्तं महासलिले चन्द्रविकरणप्रसङ्गे। तत्रापि विशिष्य सर्वत्र विष्णोश्चिन्तनमेव मुख्यमिति सकलश्रुतिस्मृतिपुराणानामभिमतम्। परन्तु न तत्तद्देवतापरोर्थः यज्ञार्थो वा त्याज्यः, किन्तु सर्वथा स्वीकार्य एवेति तदभिप्रायः।

अथापश्यत्स उदये भास्करं भास्करद्युतिः।
सोमं चैव महाभागं विशमानं दिवाकरम्॥ 3-224-11
**अमावास्यां प्रवृत्तायां मुहूर्ते रौद्र एव तु।**
**देवासुरं च सङ्ग्रामं सोऽपश्यदुदये गिरौ**॥ 3-224-12 इति महाभारते अस्य सूचना दत्ता।

**प्रजापतेर्दुहितरं** शिशुमारस्य वै ध्रुवः ।
उपयेमे **भ्रमिं नाम तत्सुतौ कल्पवत्सरौ** ॥ ०४.१०.००१ ॥ इति,
वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतम् ॥ ०४.१३.०११ ॥
स्ववींथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान् ।

पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयम् ॥ ०४.१३.०१२ ॥
पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः ।
प्रातर्मध्यन्दिनं सायमिति ह्यासन् प्रभासुताः ॥ ०४.१३.०१३ ॥
प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः ।
व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे ॥ ०४.१३.०१४ ॥
पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतिं त्रयीम् ।
अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ॥ ०६.१८.००१ ॥
सिद्धिर्भगस्य भार्याङ्ग महिमानं विभुं प्रभुम् ।
आशिषं च वरारोहां कन्यां प्रासूत सुव्रताम् ॥ ०६.१८.००२ ॥
धातुः कुहूः सिनीवाली राका चानुमतिस्तथा ।
सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥ ०६.१८.००३ ॥
अग्नीन् पुरीष्यानाधत्त क्रियायां समनन्तरः । ०६.१८.००४ ॥ इत्यादिना भागवतेपि कालावयवानामुत्पत्तिः कथारूपेणोक्ता। तत्रापि कालावयवानां तदभिमानिनां चोभयेषामेव ग्रहणं स्वरसम्।

कालांशानां नियामकोपि विष्णुरिति भागवते एवोक्तम्-
ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् ।
संवत्सरावसानेन पर्येत्यनिमिषो विभुः ॥ ०३.११.०१३ ॥
संवत्सरः परिवत्सर इडावत्सर एव च ।
अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥ ०३.११.०१४ ॥
यः सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः ।
कालाख्यया गुणमयं क्रतुभिर्वितन्वंस् तस्मै बलिं हरत वत्सरपञ्चकाय ॥ ०३.११.०१५ ॥ इति।
एवं चैतत्सिद्धं यत् अस्माभिः दृश्यमानानां आदित्यादिग्रहतारानक्षत्रादिप्रसङ्गो वेदे बहुधा निरूपितः, यज्ञश्च तदाधृत एवेति। **तादृशार्थ एव अधिदैवतार्थः इति अयङ्गारमहोदयः**।
**अस्माभिश्च वेदस्य त्र्यर्थत्ववादिभिः** 1.विष्णुरूपोर्थो मुख्यः, 2. ततः तत्तद्देवतापरोर्थः तत्रैव यज्ञस्य देवासुरसंग्राम-आकाशकायानादीनां च बाह्यार्थानामन्तर्भावः, अर्थवादत्वेनाभिमतभागानां चैतादृशार्थप्रतिपादकत्वं प्रमाणभूतत्वं च 3. अध्यात्मार्थश्च तदुत्तरः इति स्वीक्रियते इति सर्वं समञ्जसम्।

तैत्तिरीये तु अधिज्यौतिषमिति नाम दृश्यते- "अथाधिजौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपः सन्धिः । वैद्युतः सन्धानम् । इत्यधिज्यौतिषम्" (तै. आ॥०।७।३।४) इति। नात्र वस्तुनि विवादः किन्तु नाम्न्येव। अर्थस्तु यथाभूत एव।

**अर्थवादवाक्यार्थनिरूपणस्य अत्यन्तावश्यकता**

श्रौतसूत्रादिकाराः कर्मणां विधिं निरूपयामासुः। सर्वे वेदभाष्यकाराः क्वचित् रहस्यमुद्घाटितवन्तोपि। परन्तु कर्मार्थचिन्तनाय प्रवृत्ताः मीमांसकाः तदनुयायिनश्च सर्वे विध्येकचक्षुषः अर्थवादान् नैव लक्ष्यीकुर्वन्ति। तस्मात्तदीयस्वारस्यं नैव ज्ञायते। अत एव कर्मैकचक्षुष्काः यथाविधि दर्शपूर्णमासादिकं करणीयम् इत्यर्थे एव आग्रहातिशयवन्तः दर्शपूर्णमासादिमूलभूतं तत्त्वं नैव व्यालोचयन्। तेन प्रायः सर्वेषामेवार्थवादानां मूलतथ्यान्वेषणे अन्येषामप्यरुचिरुत्पन्ना। तेन सर्वमेव वेदकुलमाकुलमभूत्। एकैकस्य अग्निहोत्र-दर्शपूर्णसादिकर्मणः मूलभूतं तथ्यं ज्ञापयितुं कथाः वेदेषु निरूपिताः। ताः कथाः केवलम् अर्थवादाः स्तुत्यर्था इति मन्यमानैः कर्ममीमांसकैः तत्र न ताः कथाः सूक्ष्मरूपेणावलोक्यन्ते। तेन तत्तत्कर्मणां मूलभूततथ्यानामनवगतिरेवास्माकम्। ताश्च प्राचीनाः कथाः तत्रोदासीनानां अत एव आभ्यन्तरतथ्यशोधनाक्षमाणां आधुनिकानामस्माकम् असुशकावबोधाः इति "ते सर्वे वाक्यसमूहाः मूर्खप्रलापा" इति वयम् अन्ये पाश्चात्याश्च निश्चिनुमश्चेत् कस्यायमपराधः। नैष स्थाणोरपराधः यदेनमन्धो न पश्यति। तस्मात् तथ्यान्वेषणे कृतश्रमैरस्माभिर्भाव्यम्। महता श्रमेण सूक्ष्मतया वेदावलोकने एव तेर्थाः स्फुरन्ति। अन्यथा तु सर्वेर्थवादाः व्यर्था एव भान्ति। तथा हि-

**"प्रजापतेर्ह वै प्रजाः ससृजानस्य पर्वाणि विसस्रंसुः। स वै संवत्सर एव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयोः संधी पौर्णमासी चामावास्या चर्तुमुखानि। स विस्रस्तैः पर्वभिः न शशाक संहातुं। तमेतैर्हविर्यज्ञैर्देवा अभिषज्यन्नग्निहोत्रेणैवाहोरात्रयोः संधी तत्पर्वाभिषज्यंस्तत्समदधुः पौर्णमासेन चैवामावास्येन च पौर्णमासीं चामावास्यां च तत्पर्वाभिषज्यंस्तत्समदधुश्चातुर्मास्यैरेवर्तुमुखानि तत्पर्वाभिषज्यंस्तत्समदधुः" १.६.३. शतपथे**

**"स यः स प्रजापतिर्व्यस्रंसत । संवत्सरः सोऽथ या अस्यैताः पञ्च तन्वो व्यश्रंसन्तऽर्तवस्ते पञ्च वा ऋतवः पञ्चैताश्चितयस्तद्यत्पञ्च चितीश्चिनोत्यृतुभिरेवैनं तच्चिनोति यच्चिनोति तस्माच्चितयः" (६.१.२.[१८] शतपथे), "स यः स प्रजापतिर्व्यस्रंसत संवत्सरः सोऽथ यान्यस्य तानि पर्वाणि व्यस्रंसन्ताहोरात्राणि तानि" (१०.१.१.[२] शतपथे)**

**"चतुर्विंशतिमात्मनोऽकुरुत त्रिंशदिष्टकान्त्सोऽत्रातिष्ठत पञ्चदशे व्यूहे तद्यत्पञ्चदशे व्यूहेऽतिष्ठत तस्मात्पञ्चदशापूर्यमाणस्य रूपाणि पञ्चदशापक्षीयमाणस्य॥ अथ**

**यच्चतुर्विंशतिमात्मनोऽकुरुत तस्माच्चतुर्विंशत्यर्धमासः संवत्सरः” (१०.४.२.[ १७-१९]शतपथे)**

**एष वै देवरथो यद्दर्शपूर्णमासौ ... एते वै संवथ्सरस्य चक्षुषी यद्दर्शपूर्णमासौ...** एतौ वै **देवानागं् हरी यद्दर्शपूर्णमासौ...** एतद्वै **देवानामास्यं यद्दर्शपूर्णमासौ** ...**देवा वा अहर्यज्ञियं नाविन्दन्ते दर्शपूर्णमासावपुनन्** ..**सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन्तासाममावास्यां च पौर्णमासीं च नोपैत् ते एनमभि समनह्येतां तं यक्ष्म आर्च्छद्राजानं यक्ष्म आरदि**ति तद्राजयक्ष्मस्य जन्म... (तै. सं॥२।५।६ ||)।

इत्यादयः सहस्रशः वाक्यसमूहाः कथं व्याख्येया भवन्ति अर्थवादयथार्थज्ञानविधुरैः कर्मैकचक्षुर्भिः मीमांसकैरिति विभावनीयम्। सूक्ष्मार्थविचारविहीनाः केवलं वाक्यैकचक्षष्काः मीमांसाशास्त्रोदितरूपेणैव पूर्वोत्तरपक्षौ विमृशन्तः तदुत्तरमणुमात्रमपि विचारं संप्रदायविरोधं मन्यमानाः अत एव नवीनविचारमसहमानाः एतदेव शास्त्ररक्षणमिति अभिमन्यमानाः शास्त्रसाध्येतिकर्तव्यताज्ञानविहीनाः आधुनिकाः कथं वेदार्थं ज्ञातुं प्रभवन्ति इत्येतदालोचनीयम्। नैरुक्तादयस्तु नाममात्रेणावशिष्टाः। वैयाकरणास्तु महति भाष्ये निमग्नाः शब्दरक्षायां कृतश्रमाः अपि परनित्यान्तरङ्गापवादादिबाधिताः नार्थसंरक्षणे व्यापृताः।

प्राच्यवेदान्तिनश्च वेदं काण्डद्वयेन विभज्य उपनिषन्मात्रचक्षुष्काः निषेधप्रतियोगिसमर्पकत्वेन ब्राह्मणादिकं मन्यमानाः नैतानर्थान् द्रष्टुं प्रभवन्ति। नैयायिकास्तु गङ्गेशाब्धिम् अवगाहमानाः गदाधरपदासक्ताः अपि हेत्वाभासनिरुक्तिबाधितादिसकलरूपाः न वेदार्थदर्शने स्वमतिं कुशलां व्यापारयन्ति। ज्यौतिषविद्वांसस्तु प्रायः भविष्यदर्थकथनेन लोकानुग्रहे व्यापृताः न प्राचीनार्थालोचने कालदाने समर्थाः। वेदभाष्यादिविद्वांसः प्रायः भाष्याद्युक्तमेव युक्तं मन्वानाः नाधिकविचारे मन आदधति। अन्येषां तु एतादृशार्थचिन्तनयोग्यतैव नास्ति, किं वा कुर्वन्ति ते। तस्माद्वेदार्थचिन्तनं भारतीयविदुषां मनसो दूरे एव भवतीति अहो दैवदुर्विपाकः।

### विदुषां परमकर्तव्यम्

भारतीयाः वयं सहस्रवर्षेभ्यः परकीयाक्रमणेन तप्ताः बह्वीः शाखाः लुप्यमानाः दृष्ट्वा खिन्नाः इदानीं यथाकथंचित् स्वातन्त्र्यं प्राप्य स्वधर्माचरणे विघ्नरहिताः अभूम। समयोयं वेदार्थसंरक्षणस्य।

तस्माद्बाल्ये स्वशाखां समधीत्य व्याकरणस्य न्यायस्य पर्याप्तं परिचयं प्राप्य पूर्वोत्तरमीमांसे सम्यगधिगम्य तदुत्तरम् एतादृशशास्त्रप्रतिपादितन्यायानुसारेण सर्ववैदिकप्रकरणपर्यालोचनेन स्वशाखार्थं विद्वांसः विविदिष्यासुः। एतद्धि परमं विज्ञानम्। तदैव वेदसंरक्षणं अङ्गानां सार्थक्यं च

भवति। तस्मिन् क्रमे मार्गदर्शी च अयङ्गारमहोदय एव प्रत्यक्षं विराजते। तदीयमार्गानुसरणं शास्त्रविद्वद्भिः अस्माभिः अवश्यं करणीयम्।

**ज्योतिर्दर्शनपक्षः**

यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा।
महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः॥ ऋक्. ५.०४४.०६

स्मृतिः प्रत्यक्षमैतिह्यम् | अनुमानश्चतुष्टयम् | एतैरादित्यमण्डलम् | सर्वैरेव विधास्यते | तै. आ॥०।१।२।४ || इत्याद्यनुसारेण प्राचीनकाले चक्षुषा दर्शनेन कालसिद्धिः इति विशेषः। इममेव पक्षमाश्रिताः पुराणादिग्रन्था इति ध्येयम्। आधुनिककाले तु प्रायः गणिताधारेणैव कालगणना क्रियते।

**वृद्धगार्गीयज्यौतिषं वेदाङ्गम्**

विज्ञानेन वा ऋग्वेदं विजानाति .... ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां **नक्षत्रविद्याँ** सर्पदेवजनविद्यां इति छान्दोग्ये (7.7.1) नक्षत्रविद्याख्यस्य ज्यौतिषस्य उल्लेखो दृश्यते। किमिदं वेदाङ्गं ज्यौतिषम् इति विचार्यमाणे अथर्वपरिशिष्टादिकमेव तथा स्यादित्यौह्यत। परन्तु वृद्धगार्गीयज्यौतिषादर्वाचीनं तत्, तत्रापि गर्गोल्लेखात्। पराशरतन्त्रं च इतः प्राक् 3300 वर्षकाले रचितं, ततः प्राक्कालिकं चेदं वृद्धगार्गीयज्यौतिषम्। बहुभिः ऋषिभिः स्वस्वशाखीयसंप्रदायेषु अनेके एतादृशाः ग्रन्थाः रचिता आसन्निति एतस्मिन् ग्रन्थे कृष्णात्रेय-भागुरि-नारद-क्रोष्टुक्यादिनाम्नामुल्लेखेन ज्ञायते। परन्तु ते ग्रन्थाः नोपलब्धाः। पराशरतन्त्रं तु परवर्तिग्रन्थेषूदाहृतः भागश एवोपलब्धम्। तस्मादुपलब्धेषु वेदानुसारिषु ग्रन्थेषु प्राचीनोयं वृद्धगार्गीयज्योतिषग्रन्थः वेदाङ्गभूत इत्युन्नीयते। स्वयं वेदाङ्गत्वेन स्वात्मानं न ख्यापयति चेदपि एतदेव ऋषीणां यज्ञादिकर्मसु उपयुक्तमिति वेदाङ्गत्वं युक्तमेव।

“एवं वैदिककर्माङ्गदर्शादिकालज्ञानाय ज्यौतिषं भगवता**ऽऽदित्येन गर्गादिभिश्च** प्रणीतं बहुविधमेव” इत्यादित्यगर्गयोरुभयोः ज्यौतिषकर्तत्वमुक्तं मधुसूदनसरस्वतीकृते प्रस्थानभेदे स्फुटमुक्तम्।

“नान्तं गुणानां गच्छन्ति ततोऽनन्तोऽयमव्ययः ।
यस्य नागवधूहस्तैर्लापितं हरिचन्दनम् ॥ २१.२५ ॥
मुहुः श्वासानिलायस्तं याति दिक्पटवासताम् ।
**यमाराध्य पुराणर्षिर्गर्गो ज्योतींषि तत्त्वतः** ॥ २१.२६ ॥

ज्ञातवान् सकलं चैव निमित्तपठितं फलम् ।"  इति च ब्रह्मपुराणे वृद्धगर्गस्योल्लेखो दृश्यते। तस्य शिष्यपरंपरया प्रोक्तमिति वृद्धगार्गीयज्यौतिषमित्याख्यायते। "गर्गाणां छात्राः गार्गीयाः" इति महाभाष्ये।

**वृद्धगर्गाचार्यः**

चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि ।
तुर्मिशं सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम् ॥१॥ १९.७-८ इत्यादि
शौनकाथर्ववेदसूक्तद्वयस्य द्रष्टा गार्ग्यः अत्यन्तं प्राचीनः। स एव गर्गः स्यात्।
"गर्गस्रोतो महातीर्थमाजगामैककुण्डली।
**तत्र गर्गेण वृद्धेन तपसा भावितात्मना॥** 9-37-14
**कालज्ञानगतिश्चैव ज्योतिषां च व्यतिक्रमः।**
**उत्पाता दारुणाश्चैव शुभाश्च जनमेजय॥** 9-37-15
**सरस्वत्याः शुभे तीर्थे विदिता वै महात्मना।**
तस्य नाम्ना च तत्तीर्थं गर्गस्रोत इति स्मृतम्॥ 9-37-16
तत्र गर्गं महाभागमृषयः सुव्रता नृप।
उपासाञ्चक्रिरे नित्यं कालज्ञानं प्रति प्रभो॥" 9-37-17 इति,

"**चतुःषष्ट्यङ्गमददात्कालज्ञानं ममाद्भुतम्।**
**सरस्वत्यास्तटे तुष्टो मनोयज्ञेन पाण्डव॥** 13-18-38
तुल्यं मम सहस्रं तु सुतानां ब्रह्मवादिनाम्।
आयुश्चैव सपुत्रस्य संवत्सरशतायुतम्॥" 13-18-39 इत्यपि महाभारते शिवप्रसादेन प्राप्तं चतुःषष्ट्यङ्गं गर्गज्यौतिषम् उल्लिखितम्।

"**गर्गः पुरोहितो राजन् यदूनां सुमहातपाः ।**
व्रजं जगाम नन्दस्य वसुदेवप्रचोदितः ॥ १०.०८.००१ ॥
**ज्योतिषामयनं साक्षाद्यत्तज्ज्ञानमतीन्द्रियम् ।**
**प्रणीतं भवता येन पुमान् वेद परावरम् ॥** १०.०८.००५ ॥
त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान् कर्तुमर्हसि ।
बालयोरनयोर्नॄणां जन्मना ब्राह्मणो गुरुः ॥ १०.०८.००६ ॥

१०.०८.००७।० श्रीगर्ग उवाच
**यदूनामहमाचार्यः ख्यातश्च भुवि सर्वदा** ।
सुतं मया संस्कृतं ते मन्यते देवकीसुतम् ॥” १०.०८.००७॥

“इत्युक्त्वा यज्ञिये काले वव्रे युक्तान् स ऋत्विजः ।
कृष्णानुमोदितः पार्थो ब्राह्मणान् ब्रह्मवादिनः ॥ १०.७४.००६॥
द्वैपायनो भरद्वाजः सुमन्तुर्गोतमोऽसितः ।
वसिष्ठश्च्यवनः कण्वो मैत्रेयः कवषस्त्रितः ॥ १०.७४.००७॥
विश्वामित्रो वामदेवः सुमतिर्जैमिनिः क्रतुः ।
**पैलः पराशरो गर्गो** वैशम्पायन एव च ॥” १०.७४.००८॥ इति भागवते च प्रशंसितो गर्गः। वृद्धगर्गश्च स एव।
**उषश्शशंस गार्ग्यस्तु** शकुनन्तु बृहस्पतिः ।
मनोजयन्तु माण्डव्यः विप्रवाक्यं जनार्दनः ।। इत्यपि प्रसिद्धः श्लोकः।

“तत्र यासौ मया पूर्वं कर्णिकेत्यभिशब्दिता।
तां वर्ण्यमानामेकाग्राः समासेन निबोधत ॥
शताश्रिमेनं मेनेऽत्रिः सहस्राश्रिमृषिर्भृगुः।
अष्टाश्रिमेनं सावर्णिश्चतुरस्रन्तु भागुरिः ॥
वार्षायणिस्तु सामुद्रं शरावञ्चैव गालवः।
**ऊर्द्ध्ववेणीकृतं गार्ग्यः क्रोष्टकिः परिमण्डलम्** ॥
यद्यद्यस्य हि यत्पार्श्वं पर्वताधिपतेर्ऋषिः।
तत्तदेवास्य वेदासौ ब्रह्मैनं वेद कृत्स्नशः ॥“ 34.61-64 इति वायुपुराणे **गर्गसुतः क्रोष्टकिः** अप्युल्लिखितः। स एव वृद्धगार्गीयज्यौतिषेपि उल्लिखितः। स एव बहुधा “ओमथातः परिवेषाणां लक्षणं चैव वक्ष्यते। वृद्धगर्गो यथा पूर्वमुवाच मम सुव्रत ॥” इति अथर्वपरिशिष्टकारेण ((६१,१.१)) अर्वाक्कालिकैः वराहादिभिश्च स्वग्रन्थे वृद्धगर्गत्वेन उल्लिखितश्च।

गर्गसिद्धान्तकर्ता तु अर्वाक्कालिकः गर्गस्तु भिन्न एव।

**महासलिलग्रन्थकालः**

“मघा सौर्याणां सौम्यानां च अयननक्षत्राणाम्” (म.स 102) इति मघाद्यवर्षारम्भस्य परिगणनात् अस्य महासलिलग्रन्थस्य कालः न्यूनातिन्यूनं इतः प्राक् 3800 वर्षाणि भवन्ति इति निश्चीयते। परन्तु तत्रापि वृद्धगर्गविश्वामित्रसंवादरूपेणैव महासलिलनिरूपणात् तत्रैव भागुरि-कृष्णात्रेय-नारद-क्रोष्टुक्यादिनामोल्लेखाच्च (म.स.104) ततोपि प्राक्काले एव वृद्धगर्गस्थितिः स्यात्।

**महासलिलसंपादकः**

विख्यातविदुषः मैसूरुवास्तव्यस्य रङ्गाचार्यस्य सुपुत्रः प्रो.अयङ्गारमहोदयश्च अत्यन्तं सांप्रदायिकः वेदवेदाङ्गविदुषां कुले उत्पन्नः स्वयं बाल्यादारभ्य अनेकानि शास्त्राण्यधीत्य आभियान्त्रिकीं विद्यां चाभ्यस्य बेङ्गळूरुस्थे भारतीयविज्ञानमन्दिरे बहुकालं यावत् अनेकाः विद्याः बोधयित्वा अध्ययनाध्यापनसंशोधनैधितयशाः पराशरतन्त्र-नारदशिल्पशास्त्रयोः आविष्करणेन विहितसुरवाणीसपर्यः इदानीं ततोपि प्रधानं कोशेष्ववशिष्टं वृद्धगार्गीयज्यौतिषं सम्यक् परिष्कृत्य प्रकाशयति।

स्वकल्पितं वेदादिज्ञानपरंपराकालमानसिद्धान्तभासं (chronology theory of Vedic texts) नवीनविद्वांसोपि प्रसभं यथा त्यजेयुः तथा निरवकाशभूतोयं ग्रन्थः। समक्षमेव नूतनोयमितिहासः रचितः निरूपितश्च प्रो.अयङ्गारमहोदयः। नूनमेव सर्वे भारतीयाः एतदीयमाधमर्ण्यं चिरकालं बिभ्रीरन्, वार्धकेपि निरन्तरं सुरसरस्वतीमुपासमानस्यैतस्य सरणिं चानुकुर्युः येन वैदिकः पन्थाः सुरक्षितो भविष्यति।

**तदित्थं वृद्धगर्गाचार्यः एव स्वकीयं शास्त्रं कालेन पिहितं वीक्ष्य दुःखितः स्वयमेव प्रो.नारायण अयङ्गाररूपेणावतीर्णः महता प्रयासेन तत्प्रकाशयामास, अस्मदादींश्च क्रोष्टक्यादितुल्यान् स्वशास्त्रम् उद्बोधयामास इवेदं संजातमिति मन्येमानो विरमामि।**

***

**''महासलिलम्''**

**Author - Dr. R. N. Iyengar**
Distinguished Professor &
Director, Centre for Ancient History & Culture,
Jain University, Bengaluru

**Published by - **Central Sanskrit University, New Delhi